# श्रीमद् भागवत रसिक कुटुंब

## भवानी अष्टकम्

न तातो न माता न बन्धुर्न दाता,
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं(ङ्) गतिस्त्वं(न्) त्वमेका भवानि ॥1॥

भवाब्धावपारे महादुःखभीरु
पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः(स्) सदाहं(ङ्)
गतिस्त्वं(ङ्) गतिस्त्वं(न्) त्वमेका भवानि ॥2॥

न जानामि दानं(न्) न च ध्यानयोगं(न्)
न जानामि तन्त्रं(न्) न च स्तोत्रमन्त्रम् ।
न जानामि पूजां(न्) न च न्यासयोगं(ङ्)
गतिस्त्वं(ङ्) गतिस्त्वं(न्) त्वमेका भवानि ॥3॥

न जानामि पुण्यं(न्) न जानामि तीर्थ
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातर्

गतिस्त्वं(ङ्)गतिस्त्वं(न्) त्वमेका भवानि ॥4॥

कुकर्मी कुसङ्गी कुबुद्धिः(ख्) कुदासः(ख्)
कुलाचारहीनः(ख्) कदाचारलीनः ।
कुदृष्टिः(ख्) कुवाक्यप्रबन्धः(स्) सदाहं(ङ्)
गतिस्त्वं(ङ्) गतिस्त्वं(न्) त्वमेका भवानि ॥5॥

प्रजेशं रमेशं महेशं सुरेशं(न्)
दिनेशं(न्) निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यत् सदाहं शरण्ये
गतिस्त्वं(ङ्) गतिस्त्वं(न्) त्वमेका भवानि ॥6॥

विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं(ङ्) गतिस्त्वं(न्) त्वमेका भवानि ॥7॥

अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः(स्) सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः(फ्) प्रनष्टः(स्) सदाहं(ङ्)
गतिस्त्वं(ङ्) गतिस्त्वं(न्) त्वमेका भवानि ॥8॥

॥इति श्रीमच्छंकराचार्यकृतं भवान्यष्टकं संपूर्णम्॥